दिनांक 13-9-20

उपशास्त्री द्वितीय वर्ष, विषय-व्याकरण
ग्रन्थ-सिद्धान्तकौमुदी, अदादिप्रकरणम्

1 दोग्धि - दुह् धातोर्लट्, लटस्थाने तिप्तस्झि इति सूत्रेण तिप् प्रत्यये अनुबन्धलोपे। तिङ्शित् सार्वधातुकम् इति सार्वधातुक संज्ञायाम्, कर्तरि शप् इति शप् प्रत्यये, अदिप्रभृतिभ्यः शपः इति शपो लुक्। दादेर्धातोर्घः इति सूत्रेण हकारस्य स्थाने घकारादेशे, दुघ् ति इति जाते, झलां जशोऽन्ते इति सूत्रेण जश्त्वे झषस्तथोर्धोऽधः इति सूत्रे तकारस्य स्थाने धकारादेशे। सार्वधातुकत्वात् सार्वधातुकार्धधातुकयोः इति गुणे दोग्धि इति सिद्धम्। एवं प्रकारेण दुग्धः रूपं भवति

2 दुग्धः - दोग्धिवत्। अन्ते तस् सकारस्य रुत्वे विसर्गे,

3 धोक्षि - दुह् धातोर्लट् - लट् स्थाने तिप्तस्झि इति सूत्रेण सिप् प्रत्यये, झोऽन्तः इति अन्तादेशे तिङ्शित् -- इति सूत्रेण सार्वधातुक संज्ञायाम्, कर्तरि शप् इति शप् प्रत्यये, अदिप्रभृतिभ्यः शपः इति शपो लुक्। दादेर्धातोर्घः इति सूत्रेण हकारस्य स्थाने घकारादेशे। एकाचो बशो भष् झषन्तस्य स्ध्वोः ~~[illegible]~~ इति सूत्रेण भष्भावे दकारस्य स्थाने धकारः धुघ् सि इति जाते। झलां जशोऽन्ते इति सूत्रेण घकारस्य स्थाने जश्त्वे गकारः खरि च इति सूत्रेण चर्त्वे, आदेशप्रत्यययोः सूत्रेण सकारस्य स्थाने मूर्धन्यादेशे षकारः, ककार षकार मिलित्वा क्षकारः धोक्षि इति सिद्धम्।

सिप्

4 दुग्धे - दुह् धातोर्लट्, लट्स्थाने तिप्तस्झि इति सूत्रेण त प्रत्यये। तिङ्शित् सार्वधातुकम् इति सार्वधातुक संज्ञायां, शप् प्रत्यये, अदिप्रभृतिभ्यः शपः इति शपो लुक्, दादेर्धातोर्घः इति सूत्रेण हकारस्य स्थाने घकारादेशे। झकारस्य स्थाने जश्त्वे गकारः, झषस्तथोर्धोऽधः इति तकारस्य स्थाने धकारादेशे, दुग्धे इति सिद्धम्

अमरनाथ मिश्र
स॰प्रो॰व्याकरण
रा॰उ॰सं॰म॰वि॰
सुलसिना पूर्णिया

दिनाङ्क - 13-9-20 विषय - दर्शन तर्कसंग्रह
शास्त्री द्वितीय खण्ड:

(1) गुरुत्व निरूपणम् — आद्यपतनाऽसमवायिकारणत्वं
गुरुत्वम्। कारणत्वस्य दण्डादावपि सत्त्वात्तत्राति
व्याप्ति वारणाय असमवायीति। घटरूपादौ ~~ति~~
व्याप्ति रूपादेरपि असमवायिकारणत्वात्तत्र व्याप्ति
वारणाय पतनेति। द्वितीय पतनादौ वेगस्याऽसमवा-
यिकारणत्वात् तत्राति व्याप्तिरत: आद्येति।
पतने आद्यत्वञ्च — स्वसमानाधिकरण
पतन प्रतियोगिक ध्वंसाऽसमान कालिकत्वम्।

2 द्रव निरूपणम् — आद्य स्यन्दनाऽसमवायि
कारणत्वं द्रवत्वस्य लक्षणम्। आद्यत्वञ्च
स्यन्दने स्वसमानाधिकरण स्यन्दन प्रतियोगिक
ध्वंसाऽसमान कालिकत्वम्।
द्वितीय स्यन्दनादावाद्य स्यन्दन प्रतियोगिक
ध्वंस समानकालिकत्वादेव नाद्यत्वम्।
असमवायिपदं त्वाद्य स्यन्दन
कारण द्रवत्व निष्ठेतावन्मात्रोक्तौ दण्डादावति
व्याप्ति:, दण्डादेर्घटं प्रति, दण्डादेरपि
घटस्थ जलगताऽऽद्य स्यन्दने निमित्त
कारणत्वात्। असमवायिकारण द्रवत्व निष्ठ
तो जम्बीरादि ~~रस~~ वयवगताद्य स्यादि
रस प्रत्यक्ष गत रसस्याऽसमवायिकारण
तया तत्राति व्याप्तिरत: आद्य स्यन्दनेति।

(3) द्रवत्व द्विविधम् — ~~सांसिद्धिकं~~ सांसिद्धिकं
नैमित्तिकञ्च तत्र सांसिद्धिकं जले।
नैमित्तिकमग्निसंयोगजं घृतादिरूप पृथिव्यां
सुवर्णादौ तेजसि चेति।

(अजयनाथ मिश्र
एस० पी० बा० इं० कॉ०
रा० उ० मा० वि०
सुरवलेया पुर

दिनांक 13-9-20

उपशास्त्री प्रथम वर्ष, विषय व्याकरण
ग्रन्थ सिद्धान्त कौमुदी, तद्धित प्रकरणम्

1 षाण्मातुरः — षण्णां मातॄणामपत्यम् इति विग्रहे मातुरुत् संख्यासंभद्रपूर्वायाः इति सूत्रेण अण् प्रत्यये, अनुबन्ध लोपे उदोष्ठ्य पूर्वस्य इति सूत्रेण ऋकारस्य स्थाने उत्व रपरत्वे षाण्मातुर् अ इति जाते प्रातिपदिक संज्ञायाम्, विभक्ति कार्ये।

2 कानीनः — कन्यायाः अपत्यं पुमान् - इति विग्रहे कन्यायाः कनीन च इति सूत्रेण अण् प्रत्यये कन्यास्थाने कनीनादेशो कृते। प्रातिपदिक संज्ञायाम् विभक्ति कार्ये कानीनः (कर्णः, व्यासश्च)

3 वैनतेयः — विनताया अपत्यम् पुमान् इति विग्रहे स्त्रीभ्यो ढक् इति सूत्रेण ढक् प्रत्यये, अनुबन्ध लोपे, किति च इति वृद्धौ, आयन् एय् ईन् ईय् इयः फ-ढ-ख-छ-घां प्रत्ययादीनाम् इति सूत्रेण ढकारस्य स्थाने एय् आदेशो कृते, वैनतेय् इति दशायाम् प्रातिपदिक संज्ञायां विभक्ति कार्ये।

4 राजन्यः — क्षत्रिय जातिः अत्र राज्ञो जाता वेव इति वाच्यम् इति वार्तिकनिर्देशात् राजा-श्वशुराद् यत् इति सूत्रेण यत् प्रत्यये अनुबन्ध लोपे। नस्तद्धिते इति सूत्रेण टिलोपे प्राप्ते तं प्रबाध्य ये चाऽभावकर्मणोः इति सूत्रेण प्रकृति भावे कृते राजन्य इति जाते। प्रातिपदिक संज्ञायां विभक्ति कार्ये।

5 श्वशुर्यः — श्वशुरस्यापत्यं पुमान् इति विग्रहे राजाश्वशुराद् यत् इति सूत्रेण यत् प्रत्यय अनुबन्ध लोपे, विभक्ति कार्ये।

6 राजनः — राज्ञोऽपत्यम् पुमान् इति विग्रहे राजा-श्वशुराद् यत् इति सूत्रेण यत् प्रत्यये अनुबन्ध लोपे। नस्तद्धिते इति सूत्रेण टिलोपे प्राप्ते तं प्रबाध्य अन् इति सूत्रेण प्रकृतिभावे कृते, प्रातिपदिक संज्ञायाम् विभक्ति कार्ये।

अमरनाथ मिश्र
र सं० प्रा० व्याकरण
रा० उ० सं० म० वि०
सुलतानपुरीया